**22E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) –नियमित

## परीक्षा : मे–जून– २०२४

## सत्र ४ थे

## विषयः ऐतिहासिक काव्ये (22E444)

**दिनांक :**२५/०५/२०२४ **गुण :**१०० **वेळ :** दु. २.०० ते ५.००

**सूचना :** कोणतेही ४ प्रश्नांची उत्तरं लिहा.

प्र.१ मातृभाषया द्वयोः अनुवादं कुरुत। (२०)

१. देवस्तु हर्षस्तं प्रत्यवादीत्– करणीयमेवेदमभिहितं मान्येन। इतरथा हि मे गृहीतभुवि भोगिनाथेऽपि दायाददृष्टिरीर्ष्यालोर्भुजस्य। उपरि गच्छतीच्छति निग्रहाय ग्रहणेऽपि भ्रूलता चलितुम्। अनमत्सु शैलेष्वपि कचग्रहमभिलषति दातुं करः। तेजोदुर्विदग्धानर्ककरानपि चामराणि ग्राहयितुमीहते हृदयम्। राजशब्दरूपाणां मृगराजानामपि शिरांसि वाञ्छति पादः पाठपीठीकर्तुम्।

२. दर्पस्फुटितसरसव्रणोच्छलितरुधिरच्छटावसेकैः शोकविषप्रसुप्तं प्रबोधयन्निव पराक्रममनुजम–वादीत्–आयुष्मन्। इदं राजकुलम्, अमी बान्धवाः, परिजनोऽयम्, इयं भूमिः भूपति भुजपरिघगागलिताश्चैताः प्रजाः गतोऽहमद्यैव मालवराजकुलप्रलयाय। इदमेव तावद्वल्कल ग्रहणमिदमेव तपः शोकापगमोपायश्चायमेव यदत्यन्ताविनीतारिनिग्रहः। सोऽयं कुरुङ्गकैः कचग्रहः केसरिणः भेकैः करपातः कालसर्पस्य, वत्सकैर्बन्दिग्रहो व्याघ्रस्य, अलगदैर्गलग्रहो गरुडस्य, दारुभिर्दाहादेशो दहनस्य, तिमिरैस्तिरस्कारो रवेः मालवः परिभवः पुष्यभूतिवंशस्य।

३. प्रस्रवणनीव स्रुतान्यश्रूण्यस्तीमते महति तेजस्यन्धकारी भूतदशाशस्य प्रनष्टः प्रज्ञालोकः प्रज्वलितं हृदयम्, आत्मदाहभीत इव स्वप्नेऽपि नोपसर्पति विवेकः, बलीयसा सन्तापेन जातुषमिव विलीनमखिलं धैर्यं, पदे पदे दिग्धरोपाहतेव हरिणी मुह्यति मतिः, पुरुषद्वेषिणीव दूरत एव भ्रमति परिहरन्ती स्मृतिः, अम्बेव तातेनैव सह गता घृतिः, वार्धुषिकप्रयुक्तानीव धनानीव प्रतिदिवस वर्धन्ते दुःखानि शोकानलधूमसम्भारसम्भूताम्भोधरभरितमिव वर्षति नयनवारिधाराविसरं शरीरम्।

प्र.२अ टिप्पणीद्वयं लिखत।(३ तः२) (२०)

१. आरम्भश्लोकौ २. सन्ध्यावर्णनम् ३. स्कन्दगुप्तस्य हर्षवर्धनं प्रति गमनम्

आ द्वयोः वाक्ययोः स्पष्टीकरणं ससन्दर्भं लिखत (३ तः२) (१०)

१. प्रतापसहाया हि सत्त्ववन्तः।
२. परां भीषणतामयासीत्।
३. त्यज्यतां सर्वविश्वासिता।

प्र.३ एकं सविस्तरमुत्तरत। (२ तः१) (१०)

१. हर्षचरिते षष्ठोच्छ्वासे बाणकवेः काः विशेषताः दृश्यन्ते?

२. हर्षचरिते षष्ठोच्छ्वासे करुणारसमधिकृत्य सोदाहरणं लिखत।

प्र.४ द्वयोः अनुवादं मातृभाषया कुरुत।(३ तः२) (१०)

१. तस्याग्रजस्य तनये नृहुषानुभावे लक्ष्म्या किलाभिलषिते पोलेकेशिनाम्नि।
सासूयमात्मनि भवन्तमतः पितृव्यं ज्ञात्वापरुद्धचरितव्यवसायबुद्धौ।।

२. सन्नद्धवारणघटास्थगितान्तरालं नानायुधक्षतनरक्षतजाङ्गरागम्।
आसीज्जलं यदवमर्दितमभ्रगर्भं कौनालमम्बरमिवोर्जितसान्ध्यरागम्।।

३. अपरजलधेर्लक्ष्मीं यस्मिन्पुरीं पुरभित्प्रभे मदगजघटाकारैर्नावां शतैरवमद्रति।
जलदपटलानीकाकीर्णं नवोत्पलमेचकं जलनिधिरिव व्योम व्योम्नः समोऽभवदम्बुधिः।।

प्र.५अ एकं वाक्यं ससन्दर्भं स्पष्टीकुरुत। (१०)

१. पृथुकदम्बकदम्बकदम्बकम्। २. कविताश्रितकालिदासभारविकीर्तिः।

आ एकां टिप्पणीं लिखत। (१०)

१. ऐहोळेप्रशस्तेः महत्त्वम् २. चालुक्यवंशः

(१०)

इ एकं प्रश्नमुत्तरत्।

१. ऐतिहासिकसाधनरूपेण शिलालेखानां महत्त्वं विशदीकुरुत।

२. द्वितीयपुलकेशिनः पराक्रमं वर्णयत।

----------